वेगनाशनः, पुं, ( वेगस्य नाशनं येन । ) श्लेष्मा । इति शब्दरत्नावली ॥

वेगसरः, पुं, ( वेगेन सरति गच्छतीति । सृ + अच् । ) वेगगामिहयः । तत्पर्य्यायः । वेसरः २ अश्वतरः ३ । इति हेमचन्द्रः ॥

वेगितः, त्रि, ( वेगः सञ्जातोऽस्य । तारकादित्वात् इतच् । ) वेगविशिष्टः । यथा, आयुर्व्वेदीये ।
"न वेगितोऽन्यकार्य्यः स्यात् नाजित्वा साध्यमामयम् ॥"
इत्याह्निकतत्त्वम् ॥

वेगिहरिणः, पुं, ( वेगी वेगवान् हरिणः । ) श्रीकारी मृगः । इति राजनिर्घण्टः ॥

वेगी, [ न् ] त्रि, (वेगोऽस्यास्तीति । वेग + इनिः ।) वेगवान् । तत्पर्य्यायः । जङ्घाकारिकः २ जाङ्घिकः ३ तरस्वी ४ त्वरितः ५ प्रजवी ६ जवनः ७ जवः ८ । इत्यमरः ॥ ( यथा, हरिवंशे भविष्यपर्व्वणि । २० । ९४ ।
"अश्वाश्च वेगिनः सन्ति रथा वायुजवा मम ॥")
श्येनपक्षी । इति राजनिर्घण्टः ॥

वेचा, स्त्री, ( विच पृथग्भावे + अच् । टाप् ।) मूल्यम् । विचिर्लिधौ न पृथक्त्वे इत्यस्मात् अन् तत आप् । यथा । वेचा मूल्यञ्च वेतनम् । इति हलायुधः ॥

वेजानी, स्त्री, (विज + अच् । तमानयतीति । आ + नी + डः । गौरादित्वात् ङीष् ।) सोमराजी । इति शब्दचन्द्रिका ॥

वेड़ं, क्ली, (विड़ + अच् ।) साम्रविच्छिन्नचन्दनम् । इति राजनिर्घण्टः ॥

वेड़ा, स्त्री, ( वेड़ + टाप् । ) नौका । इति हेमचन्द्रः ॥ वेड़ीति क्वचित् पाठः ॥

वेढ़मिका, स्त्री, रोटिकाविशेषः । यथा,—
"माषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः ।
रचिता रोटिका सैव प्रोक्ता वेढ़मिका बुधैः ॥
भवेद्वेढ़मिका वल्या वृष्या रुच्यानिलापहा ।
उष्णा सन्तर्पणी गुर्व्वी वृंहणी शुक्रला परम् ॥
भिन्नमूत्रमलास्तन्यमेदःपित्तकफप्रदा ।
गुदकीलार्द्दितश्वासयकृच्छूलानि नाशयेत् ॥"
इति भावप्रकाशः ॥

वेण, ऋ ञ निशामने । वादित्रादानगमनज्ञानचिन्तासु । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् । ) ऋ, अविवेणत् । ञ, वेणति वेणते । निशामनं चाक्षुषज्ञानम् । वादित्रं मुरजादि तस्यादानं वादित्रादानम् । वादित्रं वादित्रविषयक्रिया इत्येकोऽर्थः इत्येके । इति दुर्गादासः ॥

वेणः, पुं, ( वेण + अच् ।) वर्णसङ्करजातिविशेषः । स तु अम्बष्ठायां वैदेहकाज्जातः । यथा,—
"वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥"
इति मानवे । १० । १९ ।
त्रेतायुगीयसूर्य्यवंशीयचतुर्थनृपः । स तु पृथुराजपिता । यथा, विष्णुपुराणे ।
"सत्पुत्रेण तु जातेन वेणोऽपि त्रिदिवं ययौ ।
पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना ॥"
तेन सुपुत्रेण स्वतवेदादिविधानसमन्वयगजातेन पृथुना । इति शुद्धितत्त्वम् ॥

वेणिः, स्त्री, (वी + "वीज्याज्वरिभ्यो निः ।" उणा० ४ । ४८ । इति निः । पृषोदरादित्वात् णत्वम् ।) प्रोषितभर्तृकादिधार्य्यकेशरचनाविशेषः । इति भरतः ॥ विरहिणीबद्धकचः । इति जटाधरः ॥ ( यथा, माघे । १४ । ३० ।
"तत्र नित्यविहितोपहूतिषु
प्रोषितेषु पतिषु द्युयोषिताम् ।
गुम्फिताः शिरसि वेणयोऽभव-
न्न प्रफुल्लसुरपादपस्रजः ॥")
तत्पर्य्यायः । प्रवेणिः २ । इत्यमरः ॥ वेणी ३ प्रवेणी ४ । इति भरतः ॥ वेणिका ५ । इति शब्दमाला ॥ जलसमूहः । इति जटाधरः ॥ यथा । प्रयागे गङ्गायमुनासरस्वतीमेलनं त्रिवेणी ॥

वेणिका, स्त्री, (वेणि + कन् । टाप् । ) केशबन्धनविशेषः । इति शब्दमाला ॥

वेणिवेधनी, स्त्री, जलौका । इति त्रिकाण्डशेषः ॥

वेणिमाधवः, पुं, प्रयागस्थपाषाणमयचतुर्भुजदेवताविशेषः । इति लोकप्रसिद्धः ॥

वेणी, स्त्री, ( वेणि + वा ङीष् । ) प्रवेणी । चुलेर विउणी इति भाषा । इति भरतः ॥ तत्पर्य्यायो वेणिशब्दे द्रष्टव्यः । ( यथा, कुमारे । २ । ६१ ।
"तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।
मोक्ष्यते सुरबन्दीनां वेणीर्वीर्य्यविभूतिभिः ॥")
देवताड़वृक्षः । इत्यमरः ॥ मेषी । प्रवाहः । इति हेमचन्द्रः ॥ नदीविशेषः । इति मेदिनी ॥ तस्या उत्पत्तिर्यथा,—
पृथुरुवाच ।
"कृष्णावेण्योस्तटादृयक्ताच्छिवविष्णुगणैः पुरा ।
वणिक्शरीरात् कलहा निरस्ता कथिता त्वया ।
प्रभावस्तु तयोर्नद्योः किंवा चेत्रस्य तस्य वा ।
तन्मे कथय सर्व्वज्ञ ! विस्मयोऽत्र महान् मम ॥
नारद उवाच ।
कृष्णा कृष्णतनुः साक्षाद्वेणी साक्षान्महेश्वरः ।
तत्सङ्गमप्रभावन्तु नालं वक्तुं चतुर्म्मुखः ॥
तथापि तत्समुत्पत्तिं कीर्त्तयिष्यामि ते शृणु ।
चाक्षुषस्यान्तरे पूर्व्वं मनोर्देवपितामहः ॥
स सह्यगिरिशिखरे रम्ये यजनायोद्यतोऽभवत् ।
स कृत्वा यज्ञसम्भारान् सर्व्वदेवगणैर्वृतः ॥
युक्तो हरिहराभ्यां हि तद्गिरेः शिखरं ययौ ।
भृग्वादयो मुनिगणा मुहूर्त्ते ब्रह्मदैवते ॥
तस्य दीक्षाविधानाय समाजं चक्रुरादृताः ।
अथ ज्येष्ठां स्वरां पत्नीमाहूयाचक्रुरीश्वराः ॥
सा शनैरायया तावत् भृगुर्विष्णुमुवाच ह ॥
भृगुरुवाच ।
विष्णो स्वरा त्वयाहूता साप्यायाति न हि त्वरम् ।
मुहूर्त्तातिक्रमे चैव कार्य्यो दीक्षाविधिः कथम् ॥
विष्णुरुवाच ।
नायाति चेत् स्वरा शीघ्रं गायत्र्यात्र विधीयताम् ।
एषापि न भवेदस्य भार्य्या किं पुण्यकर्म्मणि ॥
नारद उवाच ।
एवमेव हि रुद्रोऽपि विष्णुवाक्यममन्यत ।
तच्छ्रुत्वा स भृगुर्व्वाक्यं गायत्रीं ब्रह्मणस्तदा ॥
निवेश्य दक्षिणे भागे दीक्षाविधिमथाकरोत् ।
यावद्दीक्षाविधिं तस्य विधिचक्रुर्मुनीश्वराः ॥
तावदभ्याययौ तत्र स्वरा यज्ञस्थले नृप ।
ततस्तां दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह ।
सपत्नी सा परा क्रोधात् स्वरा वचनमब्रवीत् ॥
स्वरोवाच ।
अपूज्या यत्र पूज्यन्ते पूज्यानाञ्च व्यतिक्रमः ।
त्रीणि तत्र भविष्यन्ति दुर्भिक्षं मरणं भयम् ॥
मदासने कनिष्ठेयं भवद्भिः सन्निवेशिता ।
तस्मात् सर्व्वे जड़ीभूता नदीरूपा हि निश्चितम् ॥
इयञ्च दक्षिणे भागे ह्युपविष्टा मदासने ।
तस्माल्लोके सदादृश्या तनुरूपास्तु निम्नगा ॥
नारद उवाच ।
ततस्तच्छापमाकर्ण्य गायत्री कम्पिताधरा ।
समुत्थायाशपद्देवीर्य्यामाथापि तां स्वराम् ॥
गायत्र्युवाच ।
तव भर्त्ता यथा ब्रह्मा ममाप्येष तथा खलु ।
वृथा शपसि यस्मात्त्वं भव त्वमपि निम्नगा ॥
नारद उवाच ।
ततो हाहाकृताः सर्व्वे शिवविष्णुमुखेश्वराः ।
प्रणम्य दण्डवत् भूमौ स्वरां तत्र विजिज्ञपुः ॥
देवा ऊचुः ।
देवि शप्ता वयं सर्व्वे ब्रह्माद्याश्च त्वयाधुना ।
यदि सर्व्वे जड़ीभूता भविष्यामोऽत्र निम्नगाः ॥
तदा लोकत्रयं चैतत् विनश्यति च निश्चितम् ।
अविवेककृतस्तस्मात् शापोऽयं विनिवर्त्यताम् ॥
स्वरोवाच ।
नार्च्चितो हि गणाध्यक्षो भवद्भिर्यत् सुरोत्तमाः ।
तस्माद्विघ्नं समुत्पन्नमबोधजनितं खलु ॥
नापि मद्वचनं ह्येतदसत्यं खलु जायते ।
तस्मात् स्वांशैर्जड़ीभूता यूयं भवत निम्नगाः ॥
आवामपि सपत्न्यौ च स्वांशाभ्यामपि निम्नगे ।
भविष्यावोऽत्र भो देवाः पश्चिमाभिमुखावहे ॥
नारद उवाच ।
इति तद्वचनं श्रुत्वा ब्रह्मविष्णुमहेश्वराः ।
जड़रूपाभवन्नद्यः स्वांशेनैव तदा नृप ॥
तस्माद्विष्णुरभूत् कृष्णा वेणी देवो महेश्वरः ॥
ब्रह्मा ककुद्मिनी चान्या पृथगेव बभूव तु ॥"
इति पाद्मोत्तरखण्डे १५६ अध्यायः ॥
अन्यच्च ।
"सरस्वती रजोरूपा तमोरूपा कलिन्दजा ।
सत्त्वरूपा च गङ्गात्र नयन्ति ब्रह्मनिर्गुणम् ॥
इयं वेणी हि निःश्रेणी ब्रह्मवर्त्म प्रयास्यतः ।
जन्तोर्व्विशुद्धदेहस्य श्रद्धा श्रद्धामृतस्य च ॥
काशीति काचिदबला भुवनेषु रूढ़ा
लोलार्ककेशवविलोलविलोचना च ।